# RAMAKRISHNA MISSION VIDYAMANDIRA

**(Residential Autonomous College affiliated to University of Calcutta)**

**B.A./B.Sc. THIRD SEMESTER EXAMINATION, MARCH 2021**
**SECOND YEAR [BATCH 2019-22]**
**SANSKRIT (HONOURS)**
**Paper : V [CC5]**

Date : 12/03/2021
Time : 11.00 am - 1.00 pm
Full Marks : 50

1. यथामति **<u>एकस्य</u>** श्लोकस्यानुवादः कार्यः [1×5]

क) नीवाराः शुकगर्भकोटरमुखभ्रष्टास्तरूणामधः
प्रस्निग्धाः क्वचिदिङ्गुदीफलभिदः सूच्यन्त एवोपलाः।
विश्वासोपगमादभिन्नगतयः शब्दं सहन्ते मृगा-
स्तोयाधारपथाश्च वल्कलशिखानिस्यन्दरेखाङ्किताः।।

ख) रम्यान्तरः कमलिनीहरितैः सरोभि-
श्छायाद्रुमैर्नियमितार्कमयूखतापः।
भूयात् कुशेशयरजोमृदुरेणुरस्याः
शान्तानुकूलपवनश्च शिवश्च पन्थाः।।

2. यथेच्छ**<u>मेकः</u>** श्लोकः प्रसङ्गोल्लेखनपुरःसरं व्याख्येयः [1×7]

क) चित्रे निवेश्य परिकल्पितसत्त्वयोगा
रूपोच्चयेन मनसा विधिना कृता नु।
स्त्रीरत्नसृष्टिरपरा प्रतिभाति सा मे
धातुर्विभुत्वमनुचिन्त्य वपुश्च तस्याः।।

ख) यात्येकतोऽस्तशिखरं पतिरोषधीना-
तेजोद्वयस्य युगपद्व्यसनोदयाभ्यां
लोको नियम्यत इवात्मदशान्तरेषु।।

3. यथेच्छ**<u>मेकः</u>** प्रश्नः समाधेयः [1×12]

क) शाकुन्तले हस्तिवृत्तान्तस्य तात्पर्यमुपस्थाप्यताम्।

ख) शाकुन्तले दुर्वाससोऽभिशापेन कीदृशं नाट्योपयोगित्वं साधितमिति विविच्यताम्।

4. यथेच्छ**<u>मेकस्य</u>** समासो निर्णेयः [1×2]

तोयाधारपथाः, शान्तानुकूलपवनः

5. अधोलिखितयो**<u>रेकस्य</u>** सन्धिविच्छेदः कार्यः [1×1]

यात्येकतोऽस्तशिखरं, स्त्रीरत्नसृष्टिरपरा

6. यथेच्छ<u>**मेकस्य**</u> व्युत्पत्तिर्निर्णेया [1×1]

निवेश्य, प्रतिभाति

7. अधोलिखितयो<u>**रेकस्य**</u> सकारणविभक्तिर्निर्णेया [1×2]

विधिना, कमलिनीहरितैः

8. यथेच्छ<u>**मेकः**</u> प्रश्नः समाधेयः [1×10]

क) स्वप्नवासवदत्तमिति नाटकस्य प्रथमाङ्कमनुसृत्य ब्रह्मचारिवृत्तान्तं समुपस्थाप्यताम्।

ख) स्वप्नवासवदत्तमिति नाटकस्य प्रथमाङ्कसारः वर्ण्यताम्।

9. यथेच्छ<u>**मेकस्य**</u> श्लोकस्यानुवादः कार्यः [1×4]

क) विस्रब्धा हरिणाश्चरन्त्यचकिता देशागतप्रत्यया
वृक्षाः पुष्पफलैः समृद्धविटपाः सर्वे दयारक्षिताः।
भूयिष्ठं कपिलानि गोकुलधनान्यक्षेत्रवत्यो दिशो
निःसन्दिग्धमिदं तपोवनमयं धूमो हि बह्वाश्रयः।।

ख) धीरस्याश्रमसंश्रितस्य वसतस्तुष्टस्य वन्यैः फलै-
र्मानार्हस्य जनस्य वल्कलवतस्त्रासः समुत्पाद्यते।
उत्सिक्तो विनयादपेतपुरुषो भाग्यैश्चलैर्विस्मितः
कोऽयं भो निभृतं तपोवनमिदं ग्रामीकरोत्याज्ञया।।

10. <u>**एकस्य**</u> श्लोकस्य सप्रसङ्गं व्याख्या कार्या [1×6]

क) सुखमर्थो भवेद्दातुं सुखं प्राणाः सुखं तपः।
सुखमन्यद्भवेत् सर्वं दुःखं न्यासस्य रक्षणम्।।

ख) पूर्वं त्वयाप्यभिमतं गतमेवमासी-
च्छ्लाघ्यं गमिष्यसि पुनर्विजयेन भर्तुः।
कालक्रमेण जगतः परिवर्तमाना
चक्रारपङ्क्तिरिव गच्छति भाग्यपङ्क्तिः।।

———— × ————